गीतिका



प्रथमो भावः

भारतीय विद्या भवन
दिल्ली
Sa. Sam
543

वाणी-विलासः

प्रथमः भागः

(षष्ठकक्षाकृते)

573

RAM पं० रामबालकशास्त्रिणा

Bhawanipur Sri Sankaracharya Sanskrit Mahavidyalaya
Bhartiya Vidya
708
570

प्रथमावृत्तिः] सं० २००८ [मूल्यम् ॥)

दो शब्द

ज्ञात से अज्ञात की ओर' शिक्षाके इस मौलिक सिद्धान्त के अनुसार 'भज भारतीम्' के अनन्तर यह 'वाणी विलास' भी भाषा-विज्ञान एवं मनोविज्ञान के आधार पर प्रकाशित है। इसके प्रत्येक पाठ का प्रत्येक पद बालकों की शक्ति धारणा एवं रुचि का विचार करके लिखा गया है। कारक के क्रियान्वयित्व की सरलता के विचार से ही क्रियापद के उपरान्त संज्ञापद (कारकपद) का निरूपण किया गया है, उसमें भर धातु तथा राम शब्द तो प्रतीक मात्र हैं। शिक्षक तदनुसार अनेक धातुओं और संज्ञा-पदों के परिचय प्रदर्शन से कक्षा में संस्कृत का ऐसा वायुमण्डल उत्पन्न करें कि अवसर पर प्रत्येक छात्र के मुख से 'वदामि' वद, चलमि चल आदि संस्कृतवाक्य स्वतः निकला करें, और संस्कृत में बालकों की प्रशस्त रुचि हो।

क्रियापाठों में क्रियापद के साथ साथ प्रश्नोत्तर द्वारा कर्त्ता कारक का जितना अभ्यास कराया गया है उतना ही उसके स भाग में तत्तत्पाठों के विशिष्ट कारकों का भी। शिक्षक उन पदों पर सतर्कता से बालकों से प्रश्न करें और उनका उत्तर लें। उत्तम पुरुष का वाक्य तो श्यामपट्ट पर लिखकर और उसे बालकों से पढ़वाकर ही उस पर प्रश्न किये जांय, जिससे बालक स्पष्ट उत्तर दे सकें, कारकों का सारा विस्तार मुख्य पाठों में ही निहित है।

आशा है यह पुस्तक पण्डितवर्ग की मनोहर पाठनशैली से बालकों की रुचि संस्कृतभाषा की ओर उन्मुख करे संस्कृत को लोकप्रिय बनाने की [illegible] बालकों का 'वाणीविलास' पढ़ कर सकेगी।

Shri Lal Bahadur Shastri Sanskrit Vidyapeeth
Mahavidyalaya
708

—:o:—

प्रकाशकीय

सम्पूर्ण देश ने जिस तत्परता और विवेकशीलता से हिन्दी को राज्य भाषा के रूप में वरण किया है उस तत्परता और विवेकशीलता से उसकी वरिष्ठा के लिए प्रयास नहीं हो पाया। अभी तक भी अपने प्रिय स्वदेश के विभिन्न भागों में हम हिन्दी को जो सर्व-लोक-प्रिय शुद्ध तथा समृद्ध नहीं बना सके उसका एकमात्र कारण यह है कि हमने उसके मूल सांस्कृतिक आधार संस्कृत का उससे उचित संयोग स्थापित नहीं किया। इस वर्ष सम्मेलन ने इस त्रुटि का अनुभव कर यह निर्णय किया कि सम्मेलन की विभिन्न परीक्षाओं में संस्कृत अनिवार्य कर दी जाय।

यह तो निस्संदेह है कि मानव जीवन का सर्वतोमुख अभ्युदय विशेषतः सांस्कृतिक तथा आध्यात्मिक समुन्नयन करने की जितनी प्रौढ़ क्षमता संस्कृत में है, उतनी संसार की किसी भाषा या साहित्य में नहीं है। नीति के नित्य व्यवहार्य निर्देशों से लेकर उदात्त जीवन के लोकमान्य आदर्शों तक के जितने उदार तथा लोक-संग्रही भव्य पक्ष हैं, सब का एकत्र विधान संस्कृत के साम्राज्य में प्रचुर मात्रा में विद्यमान है। इसलिए मानवता के सुचारु विकास की आकांक्षा रखने वाली समस्त संस्थाओं का यह पुनीत कर्तव्य है कि वे संस्कृत का उचित सम्मान करके उसके पोषण की व्यवस्था करें।

यह प्रायः सभी अनुभव करते हैं कि हिन्दी में जो बहुत से अशुद्ध प्रयोग चल पड़े हैं जैसे आत्मा, वायु, पवन तथा समीर को स्त्रीलिंग कहना, अन्ताराष्ट्रिय को अन्तर्राष्ट्रीय लिखना; उसका एकमात्र कारण संस्कृत से अनभिज्ञता है। यदि हम हिन्दी सीखने पढ़ने वालों को संस्कृत का संस्कार

दे दें तो निश्चयतः अत्यन्त शीघ्र हिन्दी के प्रचलित दुष्प्रयोग स्वतः शुद्ध हो जायंगे।

संस्कृत का इतना महत्व होते हुए भी अभी तक लोगों के हृदय पर, उनकी बुद्धि पर, संस्कृत का ऐसा आतंक है कि वे उसे सीखना पूर्व जन्म का पुण्य अथवा अप्रतिम परिश्रम साध्य दुष्कर कार्य समझते हैं। ऐसी मनोदशा के बीच हमने विशेष आग्रह से काशी के विद्वान् पं० रामबालक शास्त्री जी से संस्कृत की क्रमिक पाठ्य पुस्तकें लिखवाई हैं। हर्ष की बात है कि शास्त्रीजी ने हमारे निवेदन को स्वीकार कर बालकों के लिए "भज भारतीम्" नामक पुस्तक (चार भाग में) तथा युवकों के लिए "वाणी विलासः" (चार भाग में) नामक पुस्तक लिख कर हमें अनुगृहीत किया है। इन पुस्तकों के सहारे कोई भी साधारण व्यक्ति अत्यन्त सरलता से संस्कृ में प्रवेश पा सकता है और अत्यन्त रुचि के साथ संस्कृत में गतिमान् हो सकता है, इन पुस्तकों की ऐसी सरल एवं सुबोध रचना है कि छात्रों के हृदय में आचार विचार के संस्कार के साथ-साथ व्याकरण का प्रशस्त ज्ञान भरा जा सकता है।

मुझे विश्वास है कि हिन्दी में सुयोग्यता प्राप्त करने के इच्छुक सुधीवृन्द तथा संस्कृत प्रेमी सभी वर्ग के लोग इन पुस्तकों का उचित उपयोग करेंगे।

दयाशंकर दुबे
साहित्य मंत्री

ज्येष्ठ कृष्णा अष्टमी, २००८

❀ श्रीः ❀

यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।
आत्मविद्या च देवी त्वं विमुक्तिफलदायिनी ॥१॥
यतो दानवाः किन्नरा यक्षसङ्घा
यतश्चारणा वारणाःश्वापदाश्च ।
यतः पक्षिकीटा यतो वीरुधश्च
सदा तं गणेशं नमामो भजामः ॥ २ ॥
रामाय रामभद्राय रामचन्द्राय वेधसे
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ ३ ॥
आशां विहाय परिहृत्य परस्य निन्दां
पापेरतिं च सुनिवार्य मनः समाधौ-
आदाय हृत्कमलमध्यगतं परेशं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ४ ॥
गुणातीत ! गुणाधार ! गुणबीज ! गुणात्मक !
गुणीश ! गुणिनां बीज ! गुणिनां गुरवे नमः ॥५॥

——:०:——

द्वितीयः पाठः

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धामत्वया ततं विश्वमनन्तरूप ॥ १ ॥

गुरुर्ब्रह्मा गुरु र्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्मतस्मै श्रीगुरवे नमः ॥ २ ॥

मूकं करोति वाचालं पंगुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥ ३ ॥

अष्टादशपुराणानां व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥ ४ ॥

त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥

येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
मयूराश्चित्रिता येन स मे वृत्तिं विधास्यति ॥

कामं क्रोधं मोहं लोभं त्यक्त्वात्मानं भावय कोऽहम् ।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥

—:❀:—

तृतीयः पाठः

घटम् भर । कलसम् भर । भवनम् भर। जलम् भर।
चणम् चर। यवम् चर। शरम् धर। वसनम् धर।
हलम् वह। घटम् वह । कलसम् वह। शरम् वह।
भवनम् खन। वनम् खन। भवनम् चल। नगरम् चल।
हरम् जप। जनकम् नम। रत्नकम् नम। नदम् तर।
वनम् चल। शरम् हर । मठम् चल । शठम् वद।



पश्य गजम् । धर दशनम्।
चल वनम् । जप जयम्।
तर जलम् । धर शरम्।
वह घटम् । पठ ग्रन्थम्।
वद शठम् । चल मठम्।

—:o:—

चतुर्थः पाठः

अयम् मठः। अयम् शठः। अयम् कलसः। अयम् जनः।
इमौ मठौ । इमौ शठौ । इमौ कलसौ । इमौ जनौ ।
इमे मठाः। इमे शठाः। इमे कलसाः। इमे जनाः।
इयम् रमा । इयम् लता । इयम् सीता । इयम् गीता ।
इमे रमे । इमे लते । इमे सीते । इमे गीते ।
इमाः रमाः। इमाः लताः। इमाः सीताः। इमाः गीताः
इदम् वनम्। इदम् जलम। इदम् भवनम्। इदम् धनम्।
इमे वने । इमे जले । इमे भवने । इमे धने ।

इमानि वनानि । इमानि जलानि।
इमानि भवनानि । इमानि धनानि ।

अयम् मठः सकलः । अयम् कलसः सजलः।
अयम् जनः सुजनः । अयम् जनः दुर्जनः ।
इयम् लता हरिता । इयम् लता शुष्का ।
इयम् गीता सरला । इयम् गीता कठिना ।
इदम् वनम् सघनम् । इदम् वनम् विरलम् ।
इदम् जलम् निर्मलम् । इदम् जलम् मलिनम् ।

——:o:——

पञ्चमः पाठः

अयम् बालकः भरति घटम् ।

कः बालक. भरति घटम् ? अयम् बालकः भरति घटम् ।

इमौ बालकौ भरतः घटौ ।

कौ बालकौ भरतः घटौ ? इमौ बालकौ भरतः घटौ ।

इमे बालकाः भरन्ति घटान् ।

के बालकाः भरन्ति घटान् ? इमे बालकाः भरन्ति घटान ।

त्वम् भरसि कलसम् ।

कः भरति कलसम् ? त्वम् भरसि कलसम् ।

युवाम् भरथः कलसौ ।

कौ भरतः कलसौ ? युवाम् भरथः कलसौ ।

यूयम् भरथ कलसान् ।

के भरन्ति कलसान् ? यूयम् भरथ कलसान् ।

अहम् भरामि मठम् ।

कः भरति मठम् ? अहम् भरामि मठम् ।

आवाम् भरावः मठौ ।

कौ भरतः मठौ ? आवाम् भरावः मठौ ।

वयम् भरामः मठान् ।

के भरन्ति मठान् ? वयम् भरामः मठान् ।

वर्तमाने (लट्) भर–ति

	एक वचने	द्विवचने	बहुवचने
प्रथम पुरुषे	भरति	भरतः	भरन्ति ।
मध्यमपुरुषे	भरसि	भरथः	भरथ ।
उत्तमपुरुषे	भरामि	भरावः	भरामः ।

एवम् चर् धर् हर् जप् जय् रूपाणि ।

गायन्ति सामकुशलाः यमजं मखेषु, ध्यायन्ति धीरमतयो यतयो विविक्ते।
पश्यन्ति गोपिपुरुषाः पुरुषं शरीरे दिग्गोचरो भवतु मेऽद्य स दीनबन्धुः ।

---:※:---

(ख)

अयम् जनः वदति श्लोकम् ।

कः जनः वदति श्लोकम् ? अयम् जनः वदति श्लोकम् ।

इमौ बालकौ वदतः श्लोकौ ।

कौ बालकौ वदतः श्लोकौ ? इमौ बालकौ वदतः श्लोकौ ।

इमे बालकाः वदन्ति श्लोकान् ।

के बालकाः वदन्ति श्लोकान् ? इमे बालकाः वदन्ति श्लोकान् ।

अयम् दासः भजति शिवम् ।

कः दासः भजति शिवम् ? अयम् दासः भजति शिवम् ।

इमौ दासौ भजतः शिवम् ।

कौ दासौ भजतः शिवम् ? इमौ दासौ भजतः शिवम् ।

इमे दासाः भजन्ति शिवम् ।

के दासाः भजन्ति शिवम् ? इमे दासाः भजन्ति शिवम् ।

त्वम् वदसि श्लोकम्

कः वदति श्लोकम् ? त्वम् वदसि श्लोकम् ।

अहम् वदामि श्लोकम् ।

कः वदति श्लोकम् ? अहम् वदामि श्लोकम् ।

——:०:——

षष्ठः पाठः

भविष्यति (लृट्) भर्-इष्यति

अयम् भरिष्यति घटम् ।

कः भरिष्यति घटम् ? अयम् भरिष्यति घटम् ।

इमौ भरिष्यतः घटम् ।

कौ भरिष्यतः घटम् ? इमौ भरिष्यतः घटम् ।

इमे भरिष्यन्ति घटम् ।

के भरिष्यन्ति घटम् ? इमे भरिष्यन्ति घटम् ।

त्वम् भरिष्यसि घटम् ।

कः भरिष्यति घटम् ? त्वम् भरिष्यसि घटम् ।

युवाम् भरिष्यथः घटम् ।

कौ भरिष्यतः घटम् ? युवाम् भरिष्यथः घटम् ।

यूयम् भरिष्यथ घटम् ।

के भरिष्यन्ति घटम् ? यूयम् भरिष्यथ घटम् ।

अहम् भरिष्यामि घटम् ।

कः भरिष्यति घटम् ? अहम् भरिष्यामि घटम् ।

आवाम् भरिष्यावः घटम् ।

कौ भरिष्यतः घटम् ? आवाम् भरिष्यावः घटम् ।

वयम् भरिष्यामः घटम् ।

के भरिष्यन्ति घटम् ? वयम् भरिष्यामः घटम् ।

	एक वचने	द्विवचने	बहुवचने
प्रथम पुरुषे	भरिष्यति	भरिष्यतः	भरिष्यन्ति ।
मध्यम ,,	भरिष्यसि	भरिष्यथः	भरिष्यथ ।
उत्तम ,,	भरिष्यामि	भरिष्यावः	भरिष्यामः ।

एवम् भज् भण् जप जय् रूपाणि

'रात्रिर्गमिष्यति भविष्यति सुप्रभातम्'

—*—

(ख)

अयम् भरिष्यति घटम् ।

अयम् कम् भरिष्यति ? अयम् घटम् भरिष्यति ।

इमौ भरिष्यतः घटौ ।

इमौ कौ भरिष्यतः ? इमौ घटौ भरिष्यतः ।

इमे भरिष्यन्ति घटान् ।

इमे कान् भरिष्यन्ति ? इमे घटान् भरिष्यन्ति ।

त्वम् भरिष्यसि घटम् ।

अहम् कम् भरिष्यामि ? त्वम् घटम् भरिष्यसि ।

युवाम् भरिष्यथः घटौ ।

आवाम् कौ भरिष्यावः ? युवाम् घटौ भरिष्यावः ।

यूयम् भरिष्यथ घटान् ।

वयम् कान् भरिष्यामः ? यूयम् घटान् भरिष्यथ ।

अहम् भरिष्यामि घटम् ।

त्वम् कम् भरिष्यसि ? अहम् घटम् भरिष्यामि ।

आवाम् भरिष्यावः घटौ ।

युवाम् कौ भरिष्यथः ? आवाम् घटौ भरिष्यावः ।

वयम् भरिष्यामः घटान् ।

यूयम् कान् भरिष्यथ ? वयम् घटान् भरिष्यामः ।

——:o:——

सप्तमः पाठः

भूतकालविशेषे (लङ्) अ–भर–त्

बालकः अभरत् घटम् ।

कः अभरत् घटम् ? बालकः अभरत् घटम् ।

बालकौ अभरताम् घटौ ।

कौ अभरताम् घटौ ? बालकौ अभरताम् घटौ ।

बालकाः **अभरन्** घटान् ।

के अभरन् घटान् ? बालकाः अभरन् घटान् ।

त्वम् अभरः घटम् ।

कः अभरत् घटम् ? त्वम् अभरः घटम् ।

युवाम् अभरतम् घटौ ।

कौ अभरताम् घटौ ? युवाम् अभरताम् घटौ ।

यूयम् अभरत घटान् ।

के अभरन् घटान् ? यूयम् अभरन् घटान् ।

अहम् अभरम् घटम् ।

कः अभरत घटम् ? अहम् अभरम् घटम् ।

आवाम् अभराव घटौ ।

कौ अभरताम् घटौ ? आवाम् अभराव घटौ ।

वयम् अभराम घटान् ।

के अभरन् घटान् ? वयम् अभराम घटान् ।

	ए० व०	द्वि० व०	ब० व०
प्रथमपुरुषे	अभरत्	अभरताम्	अभरन् ।
मध्यमपुरुषे	अभरः	अभरतम्	अभरत ।
उत्तमपुरुषे	अभरम्	अभराव	अभराम ।

एवम् जप् जय् खन् वद् हसादीनाम् रूपाणि ।

अगच्छच्चास्य न गतं प्रचण्डोऽपि प्रभञ्जनः ।

(ख)

बालकः अभरत् घटम् ।

बालकः कम् अभरत् ? बालकः घटम् अभरत् ।

बालकौ अभरताम् घटौ ।

बालकौ कौ अभरताम् ? बालकौ घटौ अभरताम् ।

बालकाः अभरन् घटान् ।

बालकाः कान् अभरन् ? बालकाः घटान् अभरन् ।

त्वम् अभरः घटम् ।

अहम् कम् अभरम् ? त्वम् घटम् अभरः ।

युवाम् अभरतम् घटौ ।

आवाम् कौ अभराव ? युवाम् घटौ अभरतम् ।

यूयम् अभरत घटान् ।

वयम् कान् अभराम ? यूयम् घटान् अभरत ।

अहम् अभरम् घटम् ।

त्वम् कम् अभरः ? अहम् घटम् अभरम् ।

आवाम् अभराव घटौ ।

युवाम् कौ अभरतम् ? आवाम् घटौ अभराव ।

वयम् अभराम घटान् ।

यूयम् कान् अभरत ? वयम् घटान् अभराम ।

——:o:——

अष्टमः पाठः

आज्ञादौ (लोट्) भर–तु

बालकः **भरतु** घटम् ।

कः भरतु घटम् ? बालकः भरतु घटम् ।

बालकौ **भरताम्** घटौ ।

कौ भरताम् घटौ ? बालकौ भरताम् घटौ ।

बालकाः **भरन्तु** घटान् ।

के भरन्तु घटान् ? बालकाः भरन्तु घटान् ।

त्वम् **भर** घटम् ।

कः भरतु घटम् ? त्वम् भर घटम् ।

युवाम् **भरतम्** घटौ ।

कौ भरताम् घटौ ? युवाम् भरतम् घटौ ।

यूयम् **भरत** घटान् ।

के भरन्तु घटान् ? यूयम् भरत घटान् ।

अहम् **भराणि** घटम् ।

कः भरतु घटम् ? अहम् भराणि घटम् ।

आवाम् **भराव** घटौ ।

कौ भरताम् घटौ ? आवाम् भराव घटौ ।

वयम् भराम घटान् ।

के भरन्तु घटान् ? वयम् भराम घटान् ।

	ए० व०	द्वि० व०	ब० व०
प्रथम पुरुषे	भरतु	भरताम्	भरन्तु ।
मध्यम पुरुषे	भर	भरतम्	भरत ।
उत्तम पुरुषे	भराणि	भराव	भराम ।

एवम् भज् भण् जप् जय् चल् खन् वद हसादीनाम् रूपाणि ।

जयतु जयतु देवो देवकीनन्दोऽयं जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो जयतु जयतु पृथ्वीभारनाशो मुकुंदः ।

—*—

(ख)

बालकः भरतु घटम् ।

बालकः कम् भरतु ? बालकः घटम् भरतु ।

बालकौ भरताम् घटम् ।

बालकौ कम् भरताम् ? बालकौ घटम् भरताम् ।

बालकाः भरन्तु घटम् ।

बालकाः कम् भरन्तु ? बालकाः घटम् भरन्तु ।

त्वम् भर घटम् ।

अहम् कम् भराणि ? त्वम् घटम् भर ।

युवाम् भरतम् घटम् ।

आवाम् कम् भराव ? युवाम् घटम् भरतम् ।

यूयम् भरत घटम् ।

वयम् कम् भराम ? यूयम् घटम् भरत ।

अहम् भराणि घटम् ।

आवाम् भराव घटम् ।

युवाम् कम् भरतम् ? आवाम् घटम् भराव ।

वयम् भराम घटान् ।

यूयम् कान् भरत ? वयम् घटान् भराम ।

—:०:—

नवमः पाठः

दासः भरेत् घटम् ।

कः भरेत् घटम् ? दासः भरेत् घटम् ।

दासौ भरेताम् घटौ ।

कौ भरेताम् घटौ ? दासौ भरेताम् घटौ ।

दासाः भरेयुः घटान् ।

के भरेयुः घटान् ? दासाः भरेयुः घटान् ।

त्वम् भरेः घटम् ।

कः भरेत् घटम् ? त्वम् भरेः घटम् ।

युवाम् भरेतम् घटौ ।

कौ भरेताम् घटौ ? युवाम् भरेतम् घटौ ।

यूयम् भरेत घटान् ।

के भरेयुः घटान् ? यूयम् भरेत घटान् ।

अहम् भरेयम् घटम् ।

कः भरेत् घटम् ? अहम् भरेयम् घटम् ।

आवाम् भरेव घटौ ।

कौ भरेताम् घटौ ? आवाम् भरेव घटौ ।

वयम् भरेम घटान् ।

के भरेयुः घटान् ? वयम् भरेम घटान् ।

विधौ (लिङ्) भर-इत्

	ए० व०	द्वि० व०	ब० व०
प्रथम पुरुषे	भरेत्	भरेताम्	भरेयुः ।
मध्यम पुरुषे	भरेः	भरेतम्	भरेत ।
उत्तम पुरुषे	भरेयम्	भरेव	भरेम ।

एवम् भज् भण् जप् जय् खन् चल् हसादीनां रूपाणि ।

औषधे चिन्तयेद् विष्णुम् ।

—:※:—

(ख)

दासः भरेत् घटम् ।

दासः कम् भरेत् ? दासः घटम् भरेत् ।

दासौ भरेताम् घटौ ।

दासौ कम् भरेताम् ? दासौ घटम् भरेताम् ।

दासाः भरेयुः घटम् ।

दासाः कम् भरेयुः ? दासाः घटम् भरेयुः ।

त्वम् भरेः घटम् ।

अहम् कम् भरेयम् ? त्वम् घटम् भरेः ।

युवाम् भरेतम् घटम् ।

आवाम् कम् भरेताम् ? युवाम् घटम् भरेतम् ।

यूयम् भरेत घटम् ।

वयम् कम् भरेम ? यूयम् घटम् भरेत ।

अहम् भरेयम् घटम् ।

अहम् कम् भरेयम् ? अहम् घटम् भरेयम् ।

आवाम् भरेव घटम् ।

युवाम् कम् भरेताम् ? आवाम् घटम् भरेव ।

वयम् भरेम घटम् ।

यूयम् कम् भरेत ? वयम् घटम् भरेम ।

कः भरेत् घटम् ? दासः कम् भरेत् ।

अहम् कम् भरेयम् ? त्वम् कम् भरेः ।

—•—

उपदेशः

सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ।

—:०:—

एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ॥ १ ॥
द्वाविमौ पुरुषौ राजन् ! स्वर्गस्योपरितिष्ठतः ।
प्रभुश्च क्षमयायुक्तो दरिद्रश्च प्रदानवान् ॥ २ ॥
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ ३ ॥
चत्वारि ते तात गृहे वसन्तु श्रियाभिजुष्टस्य गृहस्थधर्मे ।
वृद्धो ज्ञातिरवसन्नः कुलीनः सखा दरिद्रो भगिनी चानपत्यता
पञ्चाग्नयो मनुष्येण परिचर्या प्रयत्नतः ।
पिता माताग्निरात्मा च गुरुश्च भरतर्षभ ! ॥ ६ ॥
षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥

—:※:—

रिक्तम् स्थानम् भर

.....बालकः.....घटम् ।
.....बालकौ.....घटौ ।
त्वम् .. .. कलसम् ।
.....भरतः ..... ।
अहम् ..... कलसम् ।
... ... भरिष्यामः ... ... ।
बालकाः ... ... घटान् ।
... ... अभरतम् ... ... ।
कः ... ... घटम् ?
... ... भरतु ... ... ।
त्वम् ... ... घटम् ।
... ... भरामः ... ... ।
वयम् ... ... घटान् ।
... ... भरेत् ... ... ।
त्वम् ... ...कलसम् ।

निम्नाङ्कितैः पदैः वाक्यम् रचय ।

बालकः घटम् त्वम् बालकाः युवाम् अहम् बालकौ यूयम् वयम् कलसम् मठम् आवाम् मठान् मठौ भरति भरिष्यन्ति भरिष्यतः भरन्ति अभरत् भरतु अभरन् भरन्तु भर भरत भराणि भराम भरेत् भरेताम् भरेयुः ।

दशमः पाठः

रामः रक्षति । **कः** रक्षति ? रामः रक्षति ।

रामौ रक्षतः । **कौ** रक्षतः ? रामौ रक्षतः ।

रामाः रक्षन्ति । **के** रक्षन्ति ? रामाः रक्षन्ति ।

श्यामः भजति । कः भजति ? श्यामः भजति ।

श्यामौ भजतः । कौ भजतः ? श्यामौ भजतः ।

श्यामाः भजन्ति । के भजन्ति ? श्यामाः भजन्ति ।

दासः वदति । कः वदति ? दासः वदति ।

दासौ वदतः । कौ वदतः ? दासौ वदतः ।

दासाः वदन्ति । के वदन्ति ? दासाः वदन्ति ।

शकटः चलति । कः चलति ? शकटः चलति ।

शकटौ चलतः । कौ चलतः ? शकटौ चलतः ।

शकटाः चलन्ति । के चलन्ति ? शकटाः चलन्ति ।

कर्त्तरि प्रथमा ।

ए० व०	द्वि०व०	ब० व०
रामः	रामौ	रामाः । एवम् रमेश रमेन्द्र सुरेश सुरेन्द्राः
कः	कौ	के । एवम् यत् तत् सर्वशब्दाः

'आदित्यो मन्त्रसंयुक्तः आदित्यो भुवनेश्वरः'

—*—

एकादशः पाठः

हे राम ! रक्षतु ।
हे रामौ ! रक्षताम् ।
हे रामाः ! रक्षन्तु ।
हे देव ! वर्षतु ।
हे देवौ ! वर्षताम् ।
हे देवाः ! वर्षन्तु ।
भो बालक ! त्वम् वद ।
भो बालकौ ! युवाम् वदतम् ।
भो बालकाः ! यूयम् वदत ।

सम्बोधने प्रथमा

हे राम हे रामौ हे रामाः । एवम् रमेश रमेन्द्र सुरेन्द्राः
गोविन्द!केशव!जनार्दन!वासुदेव!विश्वेश!विश्वमधुसूदन!विश्वनाथ'!

——:०:——

द्वादशः पाठः

जनः भजति रामम् । कः भजति रामम् ? जनः भजति रामम्
जनः किम् भजति ? जनः रामम् भजति ।

जनौ भजतः **रामौ**। कौ भजतः रामौ ? जनौ भजतः रामौ।

जनौ **कौ** भजतः ? जनौ रामौ भजतः।

जनाः भजन्ति **रामान्**। के भजन्ति रामान्? जनाः भजन्ति रामान्

जनाः **कान्** भजन्ति ? जनाः रामान् भजन्ति।

त्वम् नमसि देवम्। कः नमति देवम् ? त्वम् नमसि देवम्।

युवाम् नमथः देवौ। कौ नमथः देवौ ? युवाम् नमथः देवौ।

आवाम् कौ नमावः ? युवाम् देवौ नमथः।

यूयम् नमथ देवान्। के नमन्ति देवान् ? यूयम् नमथ देवान्।

अहं वदामि जनम्। कः वदति जनम् ? अहम् वदामि जनम्।

त्वम् कम् वदसि ? अहम् जनम् वदामि।

आवाम् वदावः जनौ। कौ वदतः जनौ ? आवाम् वदावः जनौ।

युवाम् कौ वदथः ? आवाम् जनौ वदावः।

वयम् वदामः जनान्। के वदन्ति जनान् ? वयम् वदामः जनान्।

यूयम् कान् वदथ ? वयम् जनान् वदामः।

कर्मणि द्वितीया

रामम् रामौ रामान्। एवम् रमेश सुरेश रमेन्द्र सुरेन्द्राः

कम् कौ कान्। एवम् यत तत् एतत् शब्दाः।

गोविन्दं गोकुलानन्दं गोपालं गोपिवल्लभम्।

गोवर्धनोद्धरं धीरं तं वन्दे गोमतीप्रियम्।

त्रयोदशः पाठः

जनः जयति रामेण । कः जयति रामेण ? जनः जयति रामेण ।

जनः **केन** जयति ? जनः रामेण जयति ।

जनौ जयतः**रामाभ्याम्**। कौ जयतःरामाभ्याम् ? जनौजयतःरामाभ्याम्

जनौ **काभ्याम्** जयतः ? जनौ रामाभ्याम् जयतः ।

जनाः जयन्ति रामैः । के जयन्ति रामैः ? जनाः जयन्ति रामैः ।

जनाः **कैः** जयन्ति ? जनाः रामैः जयन्ति ।

त्वम् वहसि करेण । कः वहति करेण ? त्वम् वहसि करेण ।

अहम् केन वहामि ? त्वम् करेण वहसि ।

युवाम् वहथः**कराभ्याम्**।कौ वहतःकराभ्याम्?युवाम्वहथःकराभ्याम्

आवाम् काभ्याम् वहावः ? युवाम् कराभ्याम् वहथः ।

यूयम् वहथ करैः । के वहन्ति करैः ? यूयम् वहथः करैः ।

वयम् कैः वहामः ? यूयम् करैः वहथ ।

अहम् वहामि करेण । कः वहति करेण ? अहम् वहामि करेण ।

त्वम् केन वहसि ? अहम् वहामि करेण ।

आवाम् वहावः कराभ्याम् ।

युवाम् काभ्याम् वहथः ? आवाम् वहावः कराभ्याम् ।

वयम् वहामः करैः ।

यूयम् कैः वहथ ? वयम् वहामः करैः ।

करणे तृतीया

	ए० व०	द्वि० व०	ब० व०
रामेण	रामाभ्याम्	रामैः	। एवम् रमेश सुरेश रमेन्द्रसुरेन्द्राः ।
केन	काभ्याम्	कैः	। एवम यत् तत् एतत् शब्दाः ।

आयुष्मान केन भवति ह्यल्पायुर्वापि मानवः ।
केन वा लभते कीर्तिं केन वा लभतेश्रियम् ।

—–•—–

चतुर्दशः पाठः

जनः गुम्फति हारम् रामाय ।

कः गुम्फति हारम् रामाय ? जनः गुम्फति हारम् रामाय ।
जनः **कस्मै** गुम्फति हारम् ? जनः रामाय गुम्फति हारम् ।

जनः गुम्फति हारम् रामाभ्याम् ।

कः गुम्फति हारम् रामाभ्याम् ? जनः गुम्फति हारम् रामाभ्याम ।
जनः **काभ्याम्** गुम्फति हारम् ? जनः रामाभ्याम् गुम्फति हारम

जनः गुम्फति हारम् रामेभ्यः ।

कः गुम्फति हारम् रामेभ्यः ? जनः गुम्फति हारम् रामेभ्यः ।
जनः **केभ्यः** गुम्फति हारम् ? जनः रामेभ्यः गुम्फति हारम् ।

त्वम् नयसि देवाय ।

कः नयति देवाय ? त्वम् नयसि देवाय ।
अहम् कस्मै नयामि ? त्वम नयसि देवाय ।

युवाम् नयथः देवाभ्याम् ।

कौ नयतः देवाभ्याम ? युवाम् नयथः देवाभ्याम् ।
आवाम् काभ्याम् नयावः ? युवाम् देवाभ्याम् नयथः ।

यूयम् नयथ देवेभ्यः ।

के नयन्ति देवेभ्यः ? यूयम् नयथ देवेभ्यः ।
वयम् केभ्यः नयामः ? यूयम् देवेभ्यः नयथ ।

अहम् लिखामि जनाय ।

कः लिखति जनाय ? अहम् लिखामि जनाय ।
त्वम् कस्मै लिखसि ? अहम् लिखामि जनाय ।

आवाम् लिखावः जनाय ।

कौ लिखतः जनाय ? आवाम् लिखावः जनाय ।
युवाम् कस्मै लिखथः ? आवाम् लिखावः जनाय ।

वयम् लिखामः जनाय ।

के लिखन्ति जनाय ? वयम् लिखामः जनाय ।
यूयम् कस्मै लिखथ ? वयम् लिखामः जनाय ।

सम्प्रदाने चतुर्थी

ए० व०	द्वि० व०	ब० व०
रामाय	रामाभ्याम्	रामेभ्यः

एवम् सुरेन्द्र नरेन्द्र सुरेश नरेशाः

कस्मै	काभ्याम्	केभ्यः

एवम् यत् तत् एतत् शब्दाः

कृष्णाय वासुदेवाय देवकीनन्दनाय च
वसुदेव कुमाराय गोविन्दाय नमोनमः ।

पञ्चदशः पाठः

जनः पठति रामात् ।

कः पठति रामात् ? जनः पठति रामात् ।

जनः **कस्मात्** पठति ? जनः रामात् पठति ।

जनौ पठतः रामाभ्याम् ।

कौ रामाभ्याम् पठतः ? जनौ रामाभ्याम् पठतः ।

जनौ **काभ्याम्** पठतः ? जनौ रामाभ्याम् पठतः ।

जनाः पठन्ति रामेभ्यः ।

के पठन्ति रामेभ्यः ? जनाः पठन्ति रामेभ्यः ।

जनाः **केभ्यः** पठन्ति ? जनाः पठन्ति रामेभ्यः ।

त्वम् पतसि शैलात् ।

कः पतति शैलात् ? त्वम् पतसि शैलात् ।

युवाम् पतथः शैलाभ्याम् ।

कौ पततः शैलाभ्याम् ? युवाम् पतथः शैलाभ्याम् ।

आवाम् काभ्याम् पतावः ? युवाम् शैलाभ्याम् पतथः ।

यूयम् पतथ शैलेभ्यः ।

के पतन्ति शैलेभ्यः ? यूयम् पतथ शैलेभ्यः ।

वयम् केभ्यः पतामः ? यूयम् शैलेभ्यः पतथ ।

अहम् पतामि वृक्षात् ।

कः पतति वृक्षात् ? अहम् पतामि वृक्षात् ।

त्वम् कस्मात् पतसि ? अहम् पतामि वृक्षात् ।

आवाम् पतावः वृक्षाभ्याम् ।

कौ पततः वृक्षाभ्याम् ? आवाम् पतावः वृक्षाभ्याम् ।

युवाम् काभ्याम् पतथ : ? आवाम् वृक्षाभ्याम् पतावः ।

वयम् पतामः वृक्षेभ्यः ।

के पतन्ति वृक्षेभ्यः ? वयम् पतामः वृक्षेभ्यः ।

यूयम् केभ्यः पतथ ? वयम् वृक्षेभ्यः पतामः ।

अपादाने पञ्चमी

ए० व०	द्वि० व०	ब० व०

रामात् रामाभ्याम् रामेभ्यः एवम् रमेश सुरेश रमेन्द्रसुरेन्द्राः

कस्मात् काभ्याम् केभ्यः एवम् यत् तत् एतत् शब्दाः

आचाराल्लभते ह्यायुराचाराल्लभतेश्रियम्

आचारात् कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च ।

——:०:——

षोडशः पाठः

जनः गायति गुणम् रामस्य ।

कः गायति गुणम् रामस्य ? जनः गायति गुणम् रामस्य ।

जनः **कस्य** गुणम् गायति ? जनः रामस्य गुणम् गायति ।

जनौ गायतः गुणम् रामयोः ।

कौ गायतः गुणम् रामयोः ? जनौ गायतः गुणम् रामयोः ।

जनौ **कयोः** गुणम् गायतः ? जनौ रामयोः गुणम् गायतः ।

जनाः गायन्ति गुणम् रामाणाम् ।

के गायन्ति गुणम् रामाणाम् ? जनाः गायन्ति गुणम् रामाणाम् ।
जना **केषाम्** गुणम् गायन्ति ? जनाः रामाणाम् गुणम् गायन्ति

त्वम् लिखसि श्लोकम् रामायणस्य ।

कः लिखति श्लोकम् रामायणस्य?त्वम् लिखसि श्लोकम् रामायणस्य
अहम् कस्य श्लोकम् लिखामि ? त्वम् रामायणस्य श्लोकम् लिखसि ।

युवाम् लिखथः श्लोकम् रामायणयोः ।

कौ लिखतः श्लोकम रामायणयोः?युवाम् लिखतः श्लोकम् रामायणयोः
आवाम् कयोः श्लोकम् लिखावः?युवाम् लिखथः श्लोकम् रामायणयोः

यूयम् लिखथ श्लोकम् रामायणानाम् ।

के लिखन्तिश्लोकम्रामायणानाम?यूयम् लिखथ श्लोकम् रामायणानाम्
वयम् केषाम् श्लोकम् लिखामः? यूयम् रामायणानाम् श्लोकम् लिखथ

अहम् वदामि मन्त्रम् वेदस्य ।

कः वदति मन्त्रम् वेदस्य ? अहम् वदामि मन्त्रम् वेदस्य ।
त्वम् कस्य मन्त्रम् वदसि ? अहम् वदामि मन्त्रम् वेदस्य ।

आवाम् वदावः मन्त्रम् वेदयोः ।

कौ वदतः मन्त्रम् वेदयोः ?आवाम् वदावः मन्त्रम् वेदयोः ।
युवाम् कयोः मन्त्रम् वदथः ? आवाम् वेदयोः मन्त्रम् वदावः ।

वयम् वदामः मन्त्रम् वेदानाम् ।

के वदन्ति मन्त्रम् वेदानाम् ? वयम् वदामः मन्त्रम् वेदानाम् ।
यूयम् केषाम् मन्त्रम् वदथ ? वयम् वेदानाम् मन्त्रम् वदामः ।

सम्बन्धे षष्ठी

ए० व०	द्वि० व०	ब० व०
रामस्य	रामयोः	रामाणाम्
कस्य	कयोः	केषाम्

चरितं देवदेवस्य महादेवस्य पावनम् ।
अपारं परमोदारं चतुर्वर्गस्य साधनम् ।

——:०:——

सप्तदशः पाठः

जनः धरति धैर्यम् **रामे** ।

कः धरति धैर्यम् रामे ? जनः धरति धैर्यम् रामे ।
जनः **कस्मिन्** धैर्यम् धरति । जनः रामे धैर्यम धरति ।

जनौ धरतः धैर्यम् **रामयोः** ।

कौ धरतः धैर्यम् रामयोः ? जनौ धरतः धैर्यम् रामयोः ।
जनौ **कयोः** धैर्यम् धरतः ? जनौ रामयोः धैर्यम् धरतः ।

जनाः धरन्ति धैर्यम् **रामेषु** ।

के धरन्ति धैर्यम् रामेषु ? जनाः धरन्ति धैर्यम् रामेषु ।
जनाः **केषु** धैर्यम् धरन्ति ? जनाः रामेषु धैर्यम् धरन्ति ।

त्वम् वससि गृहे ।

कः वसति गृहे ? त्वम् वससि गृहे ।

अहम् कस्मिन वसामि ? त्वम् गृहे वससि ।

युवाम् वसथः गृहयोः ।

कौ वसतः गृहयोः ? युवाम् वसथः गृहयोः ।

आवाम् कयोः वसावः ? युवाम् गृहयोः वसथः ।

यूयम् वसथ गृहेषु ।

के वसन्ति गृहेषु ? यूयम् वसथ गृहेषु ।

वयम् केषु वसामः ? यूयम् गृहेषु वसथ ।

अहम् चलामि सन्मार्गे ।

कः चलति सन्मार्गे ? अहम् चलामि सन्मार्गे ।

त्वम् कस्मिन् चलसि ? अहम् सन्मार्गे चलामि ।

आवाम् चलावः सन्मार्गयोः ।

कौ चलतः सन्मार्गयोः ? आवाम् चलावः सन्मार्गयोः ।

युवाम् कयोः चलथः ? आवाम् सन्मार्गयोः चलावः ।

वयम् चलामः सन्मार्गेषु ।

के चलन्ति सन्मार्गेषु ? वयम् चलामः सन्मार्गेषु ।

यूयम् केषु चलथ ? वयम् सन्मार्गेषु चलामः ।

अधिकरणे सप्तमी

ए० व०	द्वि० व०	ब० व०
रामे	**रामयोः**	**रामेषु**
कस्मिन्	**कयोः**	**केषु**

औषधे चिन्तयेद् विष्णुं भोजने च जनार्दनम् ।
शयने पद्मनाभञ्च विवाहे च प्रजापतिम् ॥

पुनर्मूषको भव

अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः । तत्र तेन मुनिना काकेन नीयमानो मूषकशावको दृष्टः । ततः स्वभावदयार्द्रमनसा तेन मुनिना नीवारकणैः संवर्धितः । ततो विडालस्तं मूषकं खादितुमुपधावति । तमवलोक्य मूषकस्तस्य मुनेः क्रोडे प्रविवेश । ततो मुनिनोक्तम्— "मूषक ! त्वं मार्जारो भव" ततः स विडालः कुक्कुरं दृष्ट्वा पलायते । ततो मुनिनोक्तम्—"कुक्कुरात् बिभेषि ? । त्वमेव कुक्कुरो भव ।" स च कुक्कुरो व्याघ्राद् बिभेति । ततस्तेन मुनिना कुक्कुरो व्याघ्रः कृतः । अथ तं व्याघ्रं मुनिर्मूषकोऽयमिति-पश्यति । अथ तं मुनिं दृष्ट्वाव्याघ्रं च सर्वे वदन्ति अनेन मुनिना अयं व्याघ्रतां नीतः । एतच्छ्रुत्वा स व्याघ्रोऽचिन्तयत्—"यावदनेन मुनिना स्थीयते तावदिदं मे स्वरूपाख्यानमकीर्तिकरं न पलायिष्यते ।" इत्यालोच्य मूषकस्तं मुनिं हन्तुं गतः । ततो मुनिना तज्ज्ञात्वा 'पुनर्मूषको भव' इत्युक्त्वा मूषक एव कृतः । अतोऽहं ब्रवीमि— "नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।
मूषको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥"

लोभान्धो वकः

अस्ति मालवदेशे पद्मगर्भनामधेयं सरः । तत्रैको वृद्धो वकः सामर्थ्यहीन उद्विग्नमिवात्मानं दर्शयित्वा स्थितः । स च केनचित् कुलीरेण दृष्टः पृष्टश्च-'किमिति भवानत्राहारत्यागेन तिष्ठति" बकेनोक्तम्-

BVBSMV

"मत्स्या ममजीवनहेतवः । ते कैवर्तैरागत्य व्यायादयितव्या इति"वार्त्ता नगरोपान्ते मया श्रुता । अतोवर्तनाभावादेवास्मन्मरण-मुपस्थितमिति ज्ञात्वाऽऽहारेऽप्यनादरः कृतः ।" ततो मत्स्यैरालोचि-तम्—"इह समये तावदुपकारक एवायं लक्ष्यते । तदयमेव यथा कर्त्तव्यं पृच्छ्यताम् ।" मत्स्या ऊचु —"भोः वक ! कोऽत्र रक्षणो-पायः ! " वको ब्रूते—"अस्तिरक्षणोपायो जलाशयान्तराश्रयणम् । तत्राहमेकैकशो युष्मान्नयामि ।" मत्स्या आहुः— 'एवमस्तु' ।" ततोऽसौ वकस्तावन्मत्स्यानेकैकशो नीत्वा खादति । अनन्तरं कुलीर-स्तमुवाच—"भो वक ! मामपि तत्र नय ।" ततो वकोऽप्यश्वर्वकुलीर-मांसार्थी सादरं तं नीत्वा स्थले धृतवान् । कुलीरोऽपि मत्स्य-कण्टकाकीर्णं तत्स्थलमालोक्याचिन्तयत —'हा हतोऽस्मि मन्दभाग्यः। भवतु । इदानीं समयोचितं व्यवहरिष्यामि" इत्यालोच्य कुलीरस्त-स्य ग्रीवांचिच्छेद । स वकः पञ्चत्वं गतः । अतोऽहं ब्रवीमि— "भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान् अतिलोभात् वकः पञ्चान्मृतः कर्कटकग्रहात्" ।

वन्देमातरम्

सुजलां सुफलां मलयजशीतलाम्
शस्यश्यामलां मातरम् ।
शुभ्रज्योत्स्नांपुलकितयामिनीम् ;
फुल्लकुसुमित द्रुमदल शोभिनीम्,
सुहासिनीम् सुमधुरभाषिणीम्
सुखदां वरदां मातरम् ॥ १ ॥

मन्दिरम्

शम्भुः— भो विधो ! इदम् चित्रम् कस्य ?

विधुः— भद्र ! इदम् चित्रम् मन्दिरस्य ।

शम्भुः— अहो मन्दिरम् कीदृशम् विशालम् अस्ति ?

विधुः — इदम् मन्दिरम् परमविशालम् अस्ति ।

शम्भुः— मन्दिरोपरि किम् इदम् स्फुरति?

विधुः — मन्दिरोपरि इयम् पताका स्फुरति ।

शम्भुः — अयम् अपरः कः?

विधुः — अयम् एकः साधुः ।

शम्भुः— अयम् न साधुः, अयम् कथावाचकः व्यासः । यः कथाम् वाचयति ।

विधुः — कस्य कथाम् वाचयति ।

शम्भुः— श्रीरामचन्द्रस्य कथाम् ?

विधुः — स एव श्रीरामचन्द्रः भगवान् यः श्रीसीतायाः पतिः ?

शम्भुः— अथ किम् ?

विधुः — इयम् कथा केन लिखिता ।

शम्भुः— इयम् कथा श्रीवाल्मीकिमुनिना लिखिता

शम्भुः — तर्हि तस्य कथापुस्तकस्य किम् नाम अस्ति ।

विधुः — श्रीवाल्मीकि रामायणम् ।

शम्भुः— कथापुस्तकस्य अग्रे किम् अस्ति ?

विधुः — प्रसादः अस्ति । यः कथावसाने वितरितः भविष्यति ।

शम्भुः— अधुना कस्मिन् कार्ये संलग्नः व्यासः ?

विधुः — अधुना कथाहवने संलग्नः अस्ति व्यासः ।

—:❀:—

शरीरविज्ञानम्

नरेन्द्रः— भो सुरेन्द्र इदम् चित्रम् कस्य ?

सुरेन्द्रः — इदम् चित्रम् मानवशरीरस्य ।

नरेन्द्रः— अस्मिन् शरीरे के अवयवाः ।

नरेन्द्रः — वत्स नरेन्द्र ! यद्यपि मानवशरीरे अनेके अवयवाः सन्ति । परम् ते सर्वे चतुर्षु भागेषु विभक्ताः ।

नरेन्द्रः— भद्र ! तदा तान् मुख्यभागान् वद ?

सुरेन्द्रः — प्रथम भागः मस्तकः । मस्तकः शरीरस्य उत्तमाङ्गम् । मस्तिष्कोऽपि मस्तके वसति । येन मानवः उचितम् अनुचितम् हितम् अहितम् धर्मम् अधर्मम् वा ब्राह्मणवत् विचारयति । कार्यम् विचारस्य अधीनम् भवति । तेन शास्त्रे अपि मस्तिष्कः राजा शरीरस्य प्रसिद्धः ।

नरेन्द्रः— द्वितीयम् वद ?

सुरेन्द्रः — द्वितीयः भागः बाहुः । बाहुः क्षत्रियवत् शरीरम् रक्षति । भोजयति च भोज्यम् ।

नरेन्द्रः— एवम् तृतीयं भागम् वद ?

सुरेन्द्रः — तृतीयः भागः उदरम् । यत् वैश्यवत् रसान् समस्ते शरीरे प्रापयति । येन शरीरं जीवति ।

नरेन्द्रः— एवम् चतुर्थम् भागम् वद ?

सुरेन्द्रः — चतुर्थं भागः युगल चरणौ । एतत् चरणद्वयम् शूद्रवत् निजगमनेन शरीरं सेवते ।

नरेन्द्रः— अहो धन्यम् इदम् शरीर विज्ञानम् ?

सुरेन्द्रः — वत्स नरेन्द्र न केवलम् धन्यम् ! वरम् इदम् महाधन्य-वादार्हम् । अस्य वैशिष्ट्यम् अग्रे वर्णयामि ।

——:o:——

योगिराजः

विमलः— भो निर्मल ! इदम् चित्रम् पश्य ?

निर्मलः — पश्यामि इदम् चित्रम् मित्र !

विमलः— इदम् कस्य चित्रम् ?

निर्मलः — इदम् ऋषेः योगिराजस्य चित्रम् ।

विमलः— ऋषिः कीदृशः शान्तः अस्ति ?

निर्मलः — ऋषिः न केवलम् शान्तः अस्ति ध्यानमग्नः अपि अस्ति

विमलः— ऋषिः कीदृशे आसने उपविशति ?

निर्मलः — आसनम् न पश्यामि परम् पद्मासने उपविष्टः अस्ति

विमलः —तस्य पुरस्तात् अयम् कः? यः? ऋषिम् नमति

निर्मलः —अयम् तस्य शिष्यः प्रतीतः अस्ति यः ऋषिम् नमति।

विमलः — भो निर्मल ! नित्यम् अभिवादनेन पुरुषस्य

आयुः धनम् बुद्धिः वर्धन्ते।

निर्मलः — अहम् प्रतिदिनम् श्रेष्ठान् अभिवादयामि।

विमल — निर्मल ! ऋषेः दक्षिणभागे किम् पात्रम्?

निर्मलः — दक्षिणभागे तस्य एकः कमण्डलुः एकः लौहचिम्मटमस्ति।

गौः

सुरेन्द्रः— प्रिय नरेन्द्र ! इदम् चित्रम् पश्यसि ।

नरेन्द्रः — पश्यामि भद्र !

सुरेन्द्रः — इदम् कस्य चित्रम् ?

नरेन्द्रः — इदम् गोचित्रम् ।

सुरेन्द्रः— पश्य, गौः कीदृशी शान्ता ।

नरेन्द्रः -तेन गोपालः दुग्धम् दोग्धि ।



सुरेन्द्रः—गोपालः केनदुग्धम् दोग्धि?

नरेन्द्रः — गोपालः हस्ताभ्याम् दुग्धं दोग्धि भद्र !

सुरेन्द्र— गोपालस्य समीपे अपरम्किम् अस्ति ?

नरेन्द्रः — गोपालस्य समीपे एकः बालकः अस्ति अपरम् दुग्धपात्रम् एकम् ।

सुरेन्दः—अयम् बालकः कस्मिन् कार्ये संलग्नः अस्ति

नरेन्द्रः — अयम् बालकः दुग्धपाने संलग्नः अस्ति ।

सुरेन्दः — अयम् बालकः केन पात्रेण दुग्धम् पिबति

नरेन्द्रः — अयम् बालकः लघुपात्रेण दुग्धम् पिबति ।

सुरेन्द्रः — वत्स ! त्वम् अपि प्रतिदिनम् प्रातः काले गोदुग्धम् पिबसि ?

Shri Shankaracharya Sanskrit
708

समय विभागः

मानवस्य व्यवहाराय सप्तदिनानि भवन्ति ।

सोमवारः, मंगलवारः, बुधवारः, बृहस्पतिवारः, शुक्रवारः, शनिवारः, रविवारः, । एतैः सप्तदिवसैः सप्ताहः भवति। द्वाभ्याम् सप्ताहाभ्याम् पक्षः । पक्षद्वयेन मासः भवति । मासस्य प्रथमः पक्षः कृष्णः (वदि) द्वितीयः पक्षः शुक्लः (सुदि) भवतः ।

भारते प्रथमः मासः चैत्रः । द्वितीयः मासः वैशाखः चैत्रे वैशाखे भवति वसन्तः ऋतुः । तृतीयःमासःज्येष्ठः। चतुर्थः मासः आषाढः । ज्येष्ठे आषाढे ग्रीष्मः ऋतुः । पञ्चमः मासः श्रावणः षष्ठः मासः भाद्रपदः । श्रावणे भाद्रपदे च प्रावृट् (वर्षाकालः) सप्तमः मासः आश्विनः। अष्टमः कार्तिकः आश्विने कार्तिके च शरत्कालः । नवमः मासः अग्रहायणः । दशमः मासः पौषः । अग्रहायणे पौषे च भवति हेमन्तः ऋतुः । एकादशः मासः माघः । द्वादशः मासः फाल्गुने । माघे फाल्गुने च भवति शिशिरः ऋतुः । अनेन प्रकारेण द्वादशमासानाम् एकम् वर्षम् भवति । यस्मिन् षट् ऋतुः सदा सर्वत्र उल्लसति। भारतस्य एककोणे यदा वसन्तः क्रीडति, तदा द्वितीय कोणे वर्षाऋतुः जलेन सिञ्चति वनम् उपवनम् सदा। अहो धन्यःभारतवर्षः,यस्य क्रोडे प्रकृतिः सदा क्रीडति

DATE DUE

Class No. _____ Book No. _____

Accession No. 548

This book should be returned to the Library on the date last stamped. A fine of 0.6 nP. will be charged for each day the book is kept over time.



Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya

208



हिन्दी-साहित्य-सम्मेलन द्वारा प्रकाशित संस्कृत पुस्तकानि

पं० रामबालक शास्त्रिणा रचितानि

प्रथमकक्षाभारभ्याष्टमकक्षाकृते

'भज भारतीम्'	प्रथमवारम् ।।)	वाणी विलासः	प्रथमो भाव ।।)
,, ,,	द्वितीयवारम् ।।)	,, ,,	द्वितीयो भावः ।।)
,, ,,	तृतीयवारम् ।।)	,, ,,	तृतीयो भावः ।।)
,, ,,	चतुर्थवारम् ।।)	,, ,,	चतुर्थो भावः ।।)

प्रकाशक—हिन्दी साहित्य सम्मेलन, प्रयाग
मुद्रक—धन्नूलाल खत्री, प्रबोध यन्त्रालय, राजमन्दिर, काशी